बृहतीक्षारं मूलकं पनसं फलम्। धात्री शिरः कपालान्त्रं नखचर्म्मतिलानि च। क्षुरकर्माङ्गनासेवां प्रतिपत्प्रभृति त्यजेत्। नखं शिम्बी चर्म मसूरिका प्रतिपदादितिथिषु कुष्माण्डादिभक्षणफलं चोक्तं तिथितत्त्वे स्मृत्या यथा

"कुष्माण्डे चार्थहानिः स्याद्बृहत्यां न स्मरेद्धरिम्। बहुशत्रुः पटोले स्याद्धनहानिस्तु मूलके। कलङ्की जायते विल्वे तिर्य्यग्योनिश्च निम्बके। ताले शरीरनाशः स्यात् नारिकेले च मूर्खता। तुम्बी गोमांसतुल्या स्यात् कलम्बी गोबधात्मिका। शिम्बी पापकरी प्रोक्ता पूतिका ब्रह्मघातिका। वार्त्ताकौ सुतहानिः स्यात् चिररोगी च माषके। महापापकरं मांसं प्रतिपदादिषु वर्जयेत्"।

प्रसङ्गात्तिथिसाधनप्रकारः सि० शि० उक्तो दर्श्यते यथा "रवि १२ रसै ६र्विरवीन्दुलवाद्धृताः फलमितास्तिथयः करणानि च। कुरहृतानि च तानि बवादितः शकुनितोऽसितभूतदलादनु। ग्रहकलाः सरवीन्दुकला हृताः खखगजै ८०० र्भयोगमितिः क्रमात्। अथ हृता स्वगतैष्यविलिप्तिकाः स्वगतिभिश्च गतागतनाडिकाः" मू०। "व्यर्केन्दोर्भागा द्विष्ठाः। एकत्र रवि१२भिर्भाज्यास्तत्र फलं गतास्तिथयः। अन्यत्र रसै६र्भाज्याः। फलं गतकरणानि। तानि त्वेकोनानि बवादितो भवन्ति। कृष्णचतुर्दश्यर्द्धादुपरि यान्यवशिष्यन्ते त्रीणि चतुर्थं प्रतिपत्प्रथमार्द्धे च। एतानि चत्वारि शकुनितः। शकुनिचतुष्पाद्नागकिन्तु(किंस्तु)घ्नानीति शेषः। यस्य ग्रहस्य नक्षत्रं ज्ञातुमिष्यते तस्य कलाः कार्य्याः। तथा चन्द्रार्कयोगस्य कलाः कार्य्याः। उभयत्र शताष्टकेन ८०० हृते प्रथमस्थाने गतभानि द्वितीयस्थाने गतयोगाः। अथ यान्यवशिष्टानि तानि गतानि। तानि स्वस्वहरच्युतानि गम्यानि स्युः। तेषां गतानां सम्बन्धिन्यो विकलाः स्वस्वगतिभिर्भाज्याः। यल्लभ्यते ता गतघटिका भवन्ति। यद्येष्याणां विकला भक्तास्तदैष्या घटिका भवन्ति। अत्रोपपत्तिः। यदि व्यर्केन्दोश्चक्रांशै ३६० स्त्रिंशत् तिथयो लभ्यन्ते तदैभिः किमिति। अत्र त्रिंशतापवर्तिते हरे जातो द्वादश हरः। अथ यदि चक्रांशैः ३६० षष्टिः ६० करणानि लभ्यन्ते तदैभिः किमिति। अत्रापि षष्ट्यावर्तिते जातो हरः षण्मितः। अथ यदि चक्रकलाभिः २१६०० सप्तविंशतिर्भानि लभ्यन्ते योगा वा तदैभिः किमिति। अत्रापि सप्तविंशत्यापवर्तने कृते जातोऽष्टशती हर उभयत्र। अथ घटीकरणार्थमनुपातः। यदि गतिकलाभिः षष्टिघटिका लभ्यन्ते तदा गतैष्याभिः कलाभिः किमिति फलं गतैष्या घटिकाः। अथ कलाः षष्ट्या गुणिता विकलाः स्युरित्यतः उक्तम् अथ हृताः स्वगतैष्यविलिप्तिका इति सर्वमुपपन्नम्" प्रमि०।

सू० सि० तिथ्याद्यानयनप्रकार उक्तो यथा

"भभोगोऽष्टशतीलिप्ताः खाश्विशैलास्तथा तिथेः। ग्रहलिप्ता भभोगाप्ता भानि भुक्त्या दिनादिकम्" सू० सि०। "अष्टशतमिताः कला नक्षत्रभोगः। प्रसङ्गात् तिथिभोगमाह। खाश्विशैला इति। तिथेर्विंशत्यधिकसप्तशतमिताः ७२० कलास्तथा भोग इत्यर्थः। यस्य ग्रहस्य नक्षत्रज्ञानमिष्टं तस्य ग्रहस्य राशयस्त्रिंशद्गुणा अंशा योज्यास्ते षष्टिगुणिताः कला योज्या इति परिभाषया कला नक्षत्रभोगभक्ताः फलं ग्रहस्य गतनक्षत्राणि शेषं वर्तमाननक्षत्रस्य गतकलास्तस्मात् तस्य गतदिनाद्यानयनमाह भुक्त्येति। ग्रहस्य कलात्मिकया गत्या शेषदिनादिकं गतं भागहरणेन साध्यमेवं शेषोनाद्भोगाद्गतिकला भागेनैष्यदिनादिकं साध्यम्। अत्रोपपत्तिः। भचक्रभोगेण सप्तविंशतिनक्षत्राण्यश्विन्यादीनि ग्रहो भुनक्त्यतः सप्तविंशतिनक्षत्राणां चक्रकलाः षट्शतयुतैकविंशतिसहस्रमिता २१६०० भोगस्तदैकनक्षत्रस्य क इत्यनुपातेनाष्टशतकलाभोगः। एवं तिथेश्चान्द्रमासत्रिंशांशाच्चान्द्रमासस्य सूर्य्यचन्द्रान्तरैकभगणसिद्धत्वाच्च। त्रिंशत्तिथीनां चक्रकलाभोगस्तदैकतिथेः क इत्यनुपातेन विंशत्यधिकसप्तशतकलाभोगः ७२०। अथाष्टशतकलाभिरेकं नक्षत्रं तदा ग्रहकलाभिः किमित्यनुपातेन फलमश्विन्यादीनि ग्रहभुक्तानि शेषकला ग्रहाधिष्ठितनक्षत्रस्य गतं भोगाद्धीनं तस्यैष्यम्। यदि ग्रहगत्यैकं दिनं तदाभीष्टकलाभिः किमित्यनुपातेन तस्य गतैष्यदिवसाद्यं भवति। एवं चन्द्राद्दिननक्षत्रं ज्ञेयम्" रङ्गना०। "रवीन्दुयोगलिप्ताभ्यो योगा भभोगभाजिताः। गता गम्याश्च षष्टिघ्ना भुक्तियोगाप्तनाडिकाः" सू० सि० "सूर्य्यचन्द्रयोगस्य राश्यादिकस्य परिभाषया याः कलास्ताभ्यो योगा विष्कम्भादयो भभोगभाजिता भभोगेन पूर्वोक्तेन विभक्ता भवन्ति। एकैकयोगस्य भभोगमितो भोगः स प्रत्येकं ताभ्योऽपनीय यन्मिताः शुद्धास्तन्मिता योगा गताः। यस्य भोगो